## मातुःपितुर्भ्यामन्यतरस्याम् । (८५/९८३)

मातुर् पितुर् इत्येताभ्याम् उत्तरस्य स्वसृशब्दस्य अन्यतरस्यां मूर्धन्यादेशो भवति समासे। मातुःष्वसा, मातुःस्वसा। पितुःष्वसा, पितुःस्वसा। मातुः पितुः इति रेफान्तयोरे[1]तद्ग्रहणम्। एकदेशविकृतस्य [2]अनन्यत्वाद् विसर्जनीयान्तात् सकारान्तात् च षत्वं भवति। समासे इत्येव, वाक्ये मा भूत्। मातुः स्वसा [3]इत्येव नित्यं भवति ॥

## अभिनिसः स्तनः शब्दसञ्ज्ञायाम् । (८६/३१९३)

अभिनिस् इत्ये[4]तस्मात् उत्तरस्य [5]स्तनतिसकारस्य मूर्धन्यादेशो भवति [6]अन्यतरस्यां शब्दसञ्ज्ञायां गम्यमानायाम्। अभिनिष्टानो वर्णः, अभिनिस्तानो वर्णः। अभिनिष्टानो विसर्जनीयः, अभिनिस्तानो विसर्जनीयः। [7]शब्दसञ्ज्ञायाम् इति किम्? अभिनिस्तनति मृदङ्गः[8]। [9]समासे इति अतःप्रभृति निवृत्तम् ॥

## उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । (८७/२४७२)

उपसर्गस्थान् निमित्तात् प्रादुस्शब्दाच् चोत्तरस्य यकारपरस्य अच्परस्य च अस्तिसकारस्य मूर्धन्यो भवति। [10]अभिषन्ति। निषन्ति। विषन्ति। प्रादुःषन्ति। अभिष्यात्। निष्यात्। विष्यात्। प्रादुःष्यात्। [11]उपसर्गात् इति किम्? दधि स्यात्। मधु स्यात्। अस्ति इति किम्? [12]अनुसृतम्। विसृतम्। अथ [13]असत्यपि अस्तिग्रहणे सकारमेव प्रति उपसर्ग आश्रीयते, प्रादुःशब्दस्य च कृभ्वस्तिष्वेव प्रयोगः [14]इति अन्यत्राप्रसङ्गः? तथापि एतत् प्रत्युदाहर्तव्यम्, अनुसूते अनुसूः, [15]अनुस्वोऽपत्यं आनुसेयः। शुभ्रादित्वाड् ढक् (४.१.१२३/११२६), 'ढे लोपोऽकद्र्वाः' (६.४.१४७/११४२) इति उवर्णलोपः। यच्परः इति किम्? [16]निस्तः। विस्तः। प्रादुस्तः ॥

## सुविनिर्दुर्भ्यः सुपिसूतिसमाः । (८८/२४७७)

सु वि निर् दुर् इत्येतेभ्यः [17]उत्तरस्य सुपि सूति सम इत्येतेषां सकारस्य मूर्धन्यादेशो भवति। सुपि इति स्वपिः कृतसम्प्रसारणो गृह्यते। सुषुप्तः। विषुप्तः। निःषुप्तः। दुःषुप्तः। सूति इति स्वरूपग्रहणम्। सुषूतिः। विषूतिः। निःषूतिः। दुःषूतिः। सम -- सुषमम्। विषमम्। निःषमम्। दुःषमम्।

सुपेः षत्वं स्वपेर्मा भूद् विसुष्वापेति [18]केन न।
हलादिशेषान्न [19]सुपिरिष्टं पूर्वं [20]प्रसारणम् ॥

[21]स्थादीनां नियमो नात्र प्राक् सितादुत्तरः सुपिः।
अनर्थके विषुषुपुः सुपिभूतो द्विरुच्यते ॥ (म. भा. ३.४४७)

'पूर्वत्रासिद्धीयमद्विर्वचने' (पू. प. ९२) इति कृते षत्वे ततो द्विर्वचनम् ॥

---

1. इदं ह. 2. अन्यतरत्वात् क. 3. पितुः स्वसा इत्यधिकम् इ. ह. 4. एताभ्याम् क. 5. स्तनतेः ब. क इ. 6. अन्यतरस्यां नास्ति ब. क. इ. 7. शब्द नास्ति इ. 8. शब्दं करोति इत्यर्थः इत्यधिकम् ह. 9. वाक्यमिदं नास्ति ब. क. ड. 10. उपसर्गात् तावत् इत्यधिकम् क ड. ह. 11. उपसर्गप्रादुर्भ्याम् ब. ड. इ. 12. अनुसूतम् विसूतम् ह, परिसृतम् ड. 13. असति नास्ति इ. 14. ईत्यत्र क, इति तत्र इ. 15. अनुस्वाः क. 16. अभिस्तः ब. ड. 17. उत्तरेषां सकारस्य ब. 18. केचन क. 19. सुपेः ब. 20. सम्प्रसारणम् क. इ. 21. स्वादीनां ह.